# Kashirajakrita Shri Ganesha Stuti

# કાશિરાજકૃતા શ્રીગણેશસ્તુતિઃ

## Document Information

Text title : Kashirajakrita Shri Ganesha Stuti

File name : gaNeshastutiHkAshirAjakRRitA.itx

Category : ganesha, gaNeshapurANa, stuti

Location : doc_ganesha

Proofread by : Preeti Bhandare

Description/comments : shrIgaNeshapurANaM krIDA (uttara)khaNDaH | adhyAyaH 53 | 2.53 27-43||

Latest update : April 20, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 20, 2024

*sanskritdocuments.org*

# Kashirajakrita Shri Ganesha Stuti

# કાશિરાજકૃતા શ્રીગણેશસ્તુતિઃ

નૃપ ઉવાચ ।
નમામિ તે નાથ પદારવિન્દં બ્રહ્માદિભિર્ધ્યેયતમં શિવાય ।
યત્પદ્મપાશાસિપરશ્વધાદિ(સુ)ચિહ્નિતં વિઘ્નહરં નિજાનામ્ ॥ ૨૭॥

યદર્ચ્યતે વિષ્ણુશિવાદિભિઃ સુરૈરનેકકાર્યાર્થકરૈર્નરૈશ્ચ ।
અનેકશો વિઘ્નવિનાશદક્ષં સંસારતપ્તામૃતવૃષ્ટિકારિ ॥ ૨૮॥

નમામિ તે નાથ મુખારવિન્દં ત્રિલોચનં વહ્નિરવીન્દુતારમ્ ।
કૃપાકટાક્ષામૃતસેચનેન તાપત્રયોન્મૂલનદૃષ્ટશક્તિ ॥ ૨૯॥

નમામિ તે નાથ કરારવિન્દમનેકહેતિક્ષતદૈત્યસઙ્ઘમ્ ।
અનેકભક્તાભયદં સુરેશ ! સંસારકૂપોત્તરણાવલમ્બમ્ ॥ ૩૦॥

ત્વમેવ સત્ત્વાત્મતયા બિભર્ષિ સૃજસ્યજો રાજસતામવાપ્ય ।
તમોગુણાધારતયા ચ હંસિ ચરાચરં તે વશગં ગણેશ ॥ ૩૧॥

યઃ શુદ્ધચેતા ભજતેઽનિશં ત્વામાક્રમ્ય વિઘ્નાન્ પરિધાવસિ ત્વમ્ ।
સ ત્વાં વશે કૃત્ય સુખં હિ શેતે વત્સં યથા ગૌરિવ ધાવસિ ત્વમ્ ॥ ૩૨॥

યેઽન્યે ભજન્તઃ સમવાપ્ય તાપાન્ સંસારચક્રે બહુધા ભ્રમન્તઃ ।
કદાપિ તેઽનુગ્રહમાપ્ય તેઽપિ ભજન્તિ માનુષ્યમવાપ્ય તેઽપિ ॥ ૩૩॥

ધરારજઃ કોઽપિ મિમીત નાકે તારા ગણં વારિમુચાં ચધારાઃ ।
નાલં ગુણાનાં ગણાનાં હિ કર્તું શેષો વિધાતા તવ વર્ષપૂગૈઃ ॥ ૩૪॥

નિરાકૃતેસ્તે યદિ નાકૃતિઃ સ્યાદુપાસનાકર્મવિધિર્વૃથા સ્યાત્ ।
ગુણપ્રપઞ્ચઃ પ્રકૃતેર્વિલાસો જનસ્ય ભોગશ્ચ તથા કથં સ્યાત્ ॥ ૩૫॥

સત્સઙ્ગતિશ્ચેત્ સદનુગ્રહઃ સ્યાત્ સકર્મનિષ્ઠા સદનુસ્મૃતિશ્ચ ।
ચિત્તસ્ય શુદ્ધિર્મહતી કૃપા તે જ્ઞાનં વિમુક્તિશ્ચ ન દુર્લભા સ્યાત્ ॥ ૩૬॥

ક ઉવાચ ।

ઇતિ સ્તોત્રં સમાકર્ણ્ય પરિતુષ્ટો વિનાયકઃ ।
ઉવાચ કાશીરાજં સ વરં વૃણુ હૃદિ સ્થિતમ્ ॥ ૩૭॥

નૃપ ઉવાચ ।
જાતં વરસ્ય કૃત્યં મે યત્રાહં હિ સમાગતઃ ।
ઇતઃ પુનર્જન્મમૃતી ન સ્યાતાં તદ્ વિધીયતામ્ ॥ ૩૮॥

ફલશ્રુતિઃ -
ક ઉવાચ ।
સ્તોત્રેણ પ્રીતસ્તં પ્રાહ તથેતિ દિવ્યદેહિનમ્ ।
સ્થાપયામાસ નિકટે કલ્પકોટિયુગાવધિ ॥ ૩૯॥

મુને ! સ્તોત્રં મયા તસ્માત્ પ્રાપ્તં તસ્ય પ્રસાદતઃ ।
નારદાય મયા પ્રોક્તં નારદો ગૌતમાય ચ ॥ ૪૦॥

પ્રાહ સોઽપિ મુનીન્ સર્વાન્ સર્વકામફલપ્રદમ્ ।
જ્ઞાનદં મોક્ષદં વિઘ્નનાશનં પાવનં પરમ્ ॥ ૪૧॥

યઃ પઠેત્ સ લભેદ્ભક્તિં ગણેશસન્નિધૌ નરઃ ।
વિદ્યાકામો લભેદ્ વિદ્યાં ત્રિસન્ધ્યં યઃ પઠેન્નરઃ ॥ ૪૨॥

પુત્રકામો લભેત્ પુત્રાન્ જયકામો લભેજ્જયમ્ ।
એવં સર્વં સમાખ્યાતં યદ્ યત્ પૃષ્ટં ત્વયા મુને ॥ ૪૩॥

ઇતિ કાશિરાજકૃતા શ્રીગણેશસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ શ્રીગણેશપુરાણં ક્રીડા (ઉત્તર)ખણ્ડઃ । અધ્યાયઃ ૫૩ । ૨.૫૩ ૨૭-૪૩॥

- .. shrIgaNeshapurANaM krIDA (uttara)khaNDaH . adhyAyaH 53 . 2.53 27-43..

Proofread by Preeti Bhandare

*Kashirajakrita Shri Ganesha Stuti*
pdf was typeset on April 20, 2024

Please send corrections to *sanskrit@cheerful.com*